वानायुजानां शुभ्राणां तथा पर्व्वतवासिनाम् ।
वाजिनां बहुभिः संख्ये समन्तात् पर्य्यवारयन् ॥")

महीजः, पुं, ( मह्यां जातः । जन + डः ।) मङ्गलग्रहः । यथा, समयप्रदीपे ।
"इज्ञौ रसाब्धी सितगौ हयाब्धी
इयं महीजे विधुजे शराष्टौ ।
गुरौ शराष्टौ भृगुजे ष्टतीयं
शनौ रसाद्यन्तमिति चपायाम् ॥"

महीध्रः, पुं, ( महीं धरतीति । धृ + कः । ) पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ ( यथा, श्रीभागवते । २ । ७ । ३२ ।
"गोपैर्मखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्त्तोच्छिलीन्ध्रमिव सप्तदिनानि सप्त-
वर्षो महीध्रमनघैककरे सलीलम् ॥"
महीं धरति उद्धरतीति । धृ + कः । महीउद्धर्त्ता । यथा, तत्रैव । ३ । १३ । २६ ।
"उत्क्षिप्तबालः खचरः कठोरः
सटा विधुन्वन् खररोमशत्वक् ।
खुराहताभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्बभासे भगवान् महीध्रः ॥"
"महीध्रः पृथिव्या उद्धर्त्ता ।" इति तट्टीकायां स्वामी ॥ )

महीपालः, पुं, ( महीं पालयतीति । पाल + अण् । ) राजा । यथा, मार्कण्डेयपुराणे । ८८ । ६१ ।
"स पपात महीपृष्ठे शस्त्रसंघसमाहतः ।
नीरक्तश्च महीपाल ! रक्तवीजो महासुरः ॥"
( राजविशेषः । यथा, कथासरित्सागरे । ५६ । ७ ।
"चन्द्रस्वामिन् ! महीपालो नाम्ना कार्य्यः सुतस्त्वया ।
राजा भूत्वाचिरं यस्मात् पालयिष्यत्ययं महीम् ॥")

महीप्राचीरं, क्ली, ( मह्याः प्राचीरमिव । सर्व्वदिक्षु स्थितत्वात्तथात्वम् । ) समुद्रः । इति त्रिकाण्डशेषः ॥

महीभृत्, पुं, ( महीं बिभर्त्ति धरतीति । भृ + क्विप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च । ) पर्व्वतः । यथा, कुमारसम्भवे । १ । २७ ।
"महीभृतः पुत्त्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमालाः सविशेषसङ्गाः ॥"
( महीं बिभर्त्ति पालयतीति । भृ + क्विप् । ) राजा । यथा, मार्कण्डेयपुराणे । ८१ । १३ ।
"ये ममानुगता नित्यं प्रसादधनभोजनैः ।
अनुवृत्तिं ध्रुवं तेऽद्य कुर्व्वन्त्यन्यमहीभृताम् ॥"

महीमयः, त्रि, ( मह्या विकारोऽवयवो वेति । मही + मयट् । ) मृत्तिकानिर्म्मितः । यथा,—
मार्कण्डेयपुराणे । ६३ । ७ ।
"तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं महीमयीम् ।
अर्हणाञ्चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥"

महीरुहः, पुं, ( मह्यां रोहति जायत इति । रुह + कः । ) वृक्षः । इत्यमरः । २ । ४ । ५ । ( यथा, विष्णुपुराणे । १ । १५ । १ ।
"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥" )
शाकवृक्षः । इति राजनिर्घण्टः ॥

महीलता, स्त्री, ( मह्या लतेव । ) किञ्चुलुकः । इत्यमरः । १ । १० । २१ ॥ ( विशेषोऽस्याः किञ्चुलुकशब्दे ज्ञातव्यः ॥ )

महीसुतः, पुं, ( मह्याः सुतः । ) मङ्गलः । इत्यमरः । १ । ३ । २५ ॥ ( यथा, बृहत्संहितायाम् । १०४ । १४ ।
"रिपुगदकोपभयानि पञ्चमे
तनयकृताश्च शुचो महीसुते ।
द्युतिरपि नास्य चिरं भवेत् स्थिरा
शिरसि कपेरिव मालती कृता ॥")

महेच्छः, पुं, ( महती इच्छा यस्य । इत्यस्य सामासिकः ।) महाशयः । इत्यमरः ।३।१।३॥ ( यथा, बृहत्संहितायाम् । १६ । ६८ ।
"प्रत्यन्तधनिमहेच्छव्यवसायपराक्रमोपेताः ॥")

महेन्द्रः, पुं, ( महांश्चासाविन्द्रश्च ऐश्वर्य्यवानित्यर्थः ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ शक्रः । (यथा, भागवते ।६।१३।६।
"ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रुवन् ॥")
जम्बुद्वीपस्य पर्व्वतविशेषः । इति मेदिनी । रे, २०० ॥ ( स च सप्तकुलाचलानामन्यतमः । यथा, मार्कण्डेये । ५७ । १० ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥")

महेन्द्रकदली, स्त्री, ( महेन्द्रसम्भवा तद्वर्णा वा कदली । ) कदलीभेदः । इति राजनिर्घण्टः ॥

महेन्द्रनगरी, स्त्री, ( महेन्द्रस्य नगरी । ) अमरावती । इति शब्दरत्नावली ॥

महेन्द्रवारुणी, स्त्री, ( महेन्द्रवरुणयोरियं प्रियत्वात् । अण् । ङीष् । ) लताविशेषः । बड़ माकाल इति भाषा । तत्पर्य्यायः । चित्रवल्ली २ महाफला ३ महेन्द्री ४ चित्रफला ५ त्रपुसी ६ त्रपुषा ७ आत्मरक्षा ८ विशाला ९ दीर्घवल्ली १० महत्फला ११ महद्वारुणी १२ बृहत्फला १३ बृहद्वारुणी १४ सौम्या १५ गजचिर्भिटा १६ चित्रदेवी १७ धनुःश्रेणी १८ आखुकर्णी १९ मरुसम्भवा २० । अस्या गुणाः । इन्द्रवारुणीगुणभागित्वम् । रसे वीर्य्ये विपाके च किञ्चिद्गुणाधिकत्वञ्च । इति राजनिर्घण्टः ॥

महेन्द्राणी, स्त्री, ( महेन्द्रस्य भार्य्येति । महेन्द्र । "पुंयोगादाख्यायाम् ।" ४ ।१।४८ । इति ङीष् । "इन्द्रवरुणेति ।" ४ । १ । ४९ । इति आनुगागमः । ) इन्द्रभार्य्या । इति शब्दरत्नावली ॥ ( यथा, महाभारते । ३ । ४१ । ११ ।
"ततः सुद्भुतोऽङ्गनावानैरावतशिरोगतः ।
आजगाम महेन्द्राण्या शक्रः सुरगणैर्वृतः ॥" )

महेरणा, स्त्री, ( महत् ईरणं प्रेरणमस्याः । यद्वा, महं गजोत्सवमीरयतीति । ईर + ल्युः । टाप् ।) शल्लकीवृक्षः । इत्यमरः । २ । ४ । १४ ॥ महेरुणा इत्यपि पाठः । इत्यमरटीकायां भरतः ॥ ( यथास्याः पर्य्यायः ।
"शल्लकी गजभक्ष्या च सुवहा सुरभीरसा ।
महेरणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

महेला, स्त्री, ( मह्यते पूज्यत इति । मह + "सलिकल्यनिमहीति ।" उणा० १ । ५५ । इति इलच् । पृषोदरादित्वादिकारस्यैकारः । यद्वा, महस्योत्सवस्य इला भूमिः । ) नारी । इति शब्दरत्नावली ॥ ( यथा, नलोदये । २ । ५८ ।
"ससुद्गमहेलाभिस्फुरित-
गुणाभिस्तलसारमहेलाभि
श्रीः प्रवरमहेलाभिस्तथैव
युवपंक्तिभिः परमहेलाभिः ॥")

महेलिका, स्त्री, ( महेल + स्वार्थे कन् । टाप् । अकारस्येत्वम् । ) नारी । इति शब्दरत्नावली ॥

महेशः, पुं, ( महान् ईशः । ) शिवः । इति शब्दरत्नावली ॥ ( यथा, शिवध्यानम् ।
"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम् ।" )

महेशबन्धुः, पुं, ( महेशो बध्यते वशीक्रियते येन तत्पत्रैस्तत्पूजनत्वात् । ) श्रीफलवृक्षः । इति शब्दचन्द्रिका ॥

महेश्वरः, पुं, ( महांश्चासावीश्वरश्च कर्त्तुमकर्त्तुमन्यथाकर्त्तुं वा समर्थः । यद्वा, महत्या महामायया ईश्वरः । ) शिवः । इत्यमरः । १ । १ । ३२ ॥ अस्य व्युत्पत्तिर्यथा,—
"विश्वस्थानाञ्च सर्व्वेषां महतामीश्वरः स्वयम् ।
महेश्वरश्च तेनेमं प्रवदन्ति मनीषिणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥
अस्य विवाहस्मरणफलं यथा,—
"महेश्वरसमायुक्तमीदृशं यः स्मरेत् सदा ।
सततं तस्य कल्याणं वाञ्छितञ्च भविष्यति ॥"
इति कालिकापुराणे शिवविवाहे ४३ अध्यायः ॥
( परमेश्वरः । तदुक्तं न्यायशास्त्रे ।
"वायोर्नवैकादश तेजसो गुणा
जलक्षितिप्राणभृतां चतुर्दश ।
दिक्कालयोः पञ्च षडेव चाम्बरे
महेश्वरोऽष्टौ मनसस्तथैव च ॥"
महान् ईश्वरः प्रजानां प्रभुः । ऐश्वर्य्यशाली राजा । यथा, महाभारते । १ । २२८ । २९ ।
"ततः शक्रोऽतिसंक्रुद्धस्त्रिदशानां महेश्वरः ।
पाण्डरं गजमास्थाय तावुभौ समुपाद्रवत् ॥" )

महेश्वरकरच्युता, स्त्री, ( महेश्वरस्य करात् च्युता । ) करतोया नदी । इति केचित् ॥ गौरीविवाहसमये शङ्करकरगलितसंप्रदानतोयप्रभवत्वात्